**B.A. 1st Semester (Honours) Examination, 2020-21**

**Subject: Sanskrit**

**Course ID: 10911** **Course Code: AHSNS-101C-1**

**Course Title: Classical Sanskrit Literature (Poetry) and Chanda**

**Full Marks: 40** **Time: 2hrs**

**The figures in the margin indicate full marks.**

अधोनिर्देशानुसारं सर्वे प्रश्नाः समाधेयाः। तेषु अवश्यमेव यथेच्छं प्रश्नद्वयस्य उत्तरं संस्कृतभाषायां देवनागरलिप्या च प्रदेयम्।

## Group-A
(किरातार्जुनीये)

1. प्रश्नद्वयं समाधेयम्। 2×2=4
   a) क्रियासु युक्तैर्नृप चारचक्षुषः इत्यत्र को वक्ता कश्च भावार्थः?
   b) युधिष्ठिरः इत्यस्य व्युत्पत्तिः प्रदर्शनीया।
   c) हितं मनोहारि च दुर्लभं वचः इत्यस्य तात्पर्यं लिखत।

## Group-B
(कुमारसम्भवे)

2. प्रश्नद्वयं समाधेयम्। 2×2=4
   a) पार्वती कथं कस्य रूपं निनिन्द ?
   b) पार्वती केन कस्मात् निवारिता ?
   c) पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः इति कस्या उक्तिः कां प्रति ?

## Group-C
(छन्दोमञ्जर्याम्)

3. एकः प्रश्नः समाधेयः। 2×1=2
   a) रुचिरा इत्यस्य लक्षणं लिखत।
   b) प्रहर्षिणी इत्यस्य लक्षणं लिखत।

अधोनिर्देशानुसारं सर्वे प्रश्नाः समाधेयाः। तेषु सर्वेषाम् एव उत्तरं संस्कृतभाषायां देवनागरलिप्या च प्रदेयम्।

## Group-A
(किरातार्जुनीये)

4. एकस्य श्लोकस्य व्याख्या कार्या। 5×1=5

a) कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।।

b) स किं सखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।।

## Group-B
(कुमारसम्भवे)

5. एकस्य श्लोकस्य व्याख्या कार्या। 5×1=5

a. इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्।।

b. यदा फलं पूर्वतपःसमाधिना
न तावता सभ्यममंस्त काङ्क्षितम्।
तदानपेक्ष्य स्वशरीरमार्दवं
तपो महात्मा चरितुं प्रचक्रमे।।

## Group-C
(छन्दोमञ्जर्याम्)

3. एकमाश्रित्य टीका लेख्या। 5×1=5

a) शिखरिणी।

b) मालिनी।

4. अधोनिर्दिष्टेषु चरणद्वयस्य छन्दोनिर्णयं कार्यम्। 2½×2=5

a) पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः।

b) स वर्णिलिङ्गी विदितः समाययौ।

c) अर्थो हि कन्या परकीय एव।

d) चित्रे निवेश्य परिकल्पितसत्त्वयोगा।

5. अधोलिखितेषु एकस्य प्रश्नस्योत्तरं लेख्यम्। 10×1=10

a) किरातार्जुनीयम् इति महाकाव्यानुसारं वनेचरवचनं लिख्यताम्।

b) किरातार्जुनीयम् इति महाकाव्यानुसारं द्रौपदीवचनं लिख्यताम्।

c) कुमारसम्भवम् इति महाकाव्यानुसारं शिवपार्वत्योः संवाद आलोचनीयः।